# अभ्यासपाठः २७

| | पुल्लिङ्गशब्दाः | नपुंसकलिङ्गशब्दाः | स्त्रीलिङ्गशब्दाः |
|---|---|---|---|
| | चषकः | पात्रम् | स्थालिका |
| | चमसः | व्यञ्जनम् | पाकशाला |
| | सूपः | तक्रम् | टिका |
| | कटः | लवणम् | छुरिका |
| | मन्त्रः | फेनकम् | मरीचिका |
| | सूचनारवः | आलुकम् | लेखनी |
| | दीपः | गृन्जनकम् | अङ्कनी |
| | स्यूतः | मूलकम् | घटी |
| | श्लोकः | भोजनम् | कर्तरी |
| | ग्रन्थः | मित्रम् | सम्मार्जनी |

प्रयोगपरिवर्तनं कुर्वन्तु ।

१ सः चषकं प्रक्षालयति ।
२ एषा पात्रम् आनयति ।
३ रणवीरः स्थालिकां स्थापयति ।
४ भगिनी पेटिकाम् उद्घाटयति ।
५ सा व्यञ्जनं खादति ।
६ अहं भोजनं करोमि ।
७ रामानन्दः चमसान् स्वीकरोति ।
८ उमा दीपान् ज्वालयति ।
९ प्रसादः मरीचिकाः खादति ।
१० सरोजा स्यूतान् वहति ।
११ परिवेषकः पाकशालां गच्छति ।
१२ विनायकः फेनकानि आनयति ।
१३ चोरः छुरिकां गृह्णाति ।
१४ अनन्तः सूचनारवं करोति ।
१५ आचार्यः मरीचिकां खादति ।
१६ चोरः लेखनीं चोरयति ।
१७ नम्रता गृञ्जनकम् इच्छति ।
१८ मङ्गला अङ्कनीं नयति ।
१९ शान्तला मूलकं जिघ्रति ।
२० पाचकाः सूपं कुर्वन्ति ।
२१ अहं मित्राणि पश्यामि ।
२२ ते सम्मार्जनीं नयन्ति ।
२३ राजीवः लवणं त्यजति ।
२४ श्रीमति कर्तरीं स्वीकरोति ।
२५ गीता भोजनं न करोति ।
२६ पन्नलालः सूपं परिवेषयति ।
२७ सर्वे स्थालिकाः आनयन्ति ।
२८ टीकारामः घटीं विस्मरति ।
२९ अनिता आलुकं न खादति ।

३० सा चमसम् आनयति ।
३१ का मन्त्रं न वदति ?
३२ भवान् चषकान् ददाति ।
३३ सः कटं सम्यक् करोति ।
३४ भवती छुरिकाः अन्तः स्थापयति ।
३५ कः तक्रम् इच्छति ?
३६ एषः लेखनीः क्रीणाति ।
३७ अहं पत्राणि प्रक्षालयामि ।
३८ कविः श्लोकान् लिखति ।
३९ छात्राः ग्रन्थान् नयन्ति ।
४० बालकृष्णः पेटिकाः प्रेषयति ।

---

**Encoded by Sarada Susarla**
**Send corrections to sanskrit@cheerful.com**